S673
F – 4
Complete — [illegible]

नं० ५६७३–घ

~~कालिकास्तवराज~~ (तन्नाम)

पत्राणि ४– (चत्वारि) (सम्पूर्णम्)

~~नं० १२१२~~

कालिकास्तवराजः ~~१७०~~

१६५



का॰ स्त॰ १

ॐ श्रीगणेशाय नमः ब्रह्माशक्रादिवंद्यः शशधरकमलालं
कृतांघ्रिस्त्रिमूर्त्तिः सर्वज्ञः सेंदुखंडो मधुमथनसमालिंगितो सो-
हिमूर्त्तिः हंहे श्णनौ च साग्री विस्फुरति लतितौ दक्षिणे कालिके त्वां भू
यस्ते सर्वसिद्धौ दहनलनयोः संगतां प्रोह्णणाति १ पिंगोग्राभिर्जी
टाभिः शशधरशकलोत्तंसमंसानुषक्तो ज्वालव्यालोपवीतज
लधरशकलोत्तंसमंसानुद दनलचिताभ्यंतरोत्तानसुप्तं भीमास्यं
स्थूलहस्तं शशिकरविषदप्रेतभूतेशमंघ्रि द्वंद्वेनाक्रम्य तां स्वोर
सिहसित महाकालहृद्राग्रसंस्थां २ कालाभ्राभां कटारप्रसृम
रललितो मुक्तिधम्मिल्लभारा मारक्तोष्टां त्रिनेत्रामभयवरनरच्छि-
न्नमुंडासिहस्तां दिग्वस्त्रां नारहस्तोच्चयकृतरशनां प्रेतयुग्मावतं

सा मन्योन्यग्रंथिकेशग्रथितगलदसृङ्मुंडमालाभिदीप्तां ३
लोलजिह्वोग्रदंष्ट्राननकमलवलत् घोररावाट्टहासां पीनोत्तुंग
स्तनाभ्यां पुरहरतरुणीं योगिनीभिः समेतां यस्त्वां मातः कदापि स्व
मनसि कुरुते तस्य पुण्यैः किमन्यैस्तीर्थैः स्नानैस्तपोभिर्गुरुभिर
घ महादानदीक्षादिभिर्वा ४ हेलालोलाभिरावलितकुटिलघनो
न्मुक्तकेशव्रजाभिर्मद्यश्यामाभिरुद्यद्दिनकरकिरणैस्तीक्ष्णै
र्भीषणाभिः दक्षे पाणौ कृपाणं शितमितरकरे तर्जनीं बिभ्रतीभिः
दंष्ट्राघोराननाभिर्युवतिभिरभितो योगिनीभिः समेतां ५ फेत्
कुर्वन् फेरुवर्गध्वनिजनितमुदं स्मेरवक्त्रारविंदां मंदस्तोक
प्रसन्नस्मितवदनमहाकालरुद्राग्रसंस्थां येत्त्वां ध्यायंति मातः

का· स्त· २

2

क्वचिदपि न भवंत्यापदां भागिनस्ते तेषां दासा भवंतीति सुरपत
यः सर्वसिद्ध्यर्जितानां ६ तीर्थे वा शून्यदेशे शिखरिणि सरितां सं
गमे गह्वरे वा शून्यागारे श्मशाने शवहृदि सुरते चत्वरे वा प्रदेशे
स्वेच्छाचारा जपंतः स्तवमिममखिलं चिंतयन् योंबिके त्वां जुह्वंतः
कामयंते यदिह किमपि तत् सिद्ध्यति स्वेष्टमेषां ७ ग्राबं वाच्छा
गलं बा वरमहिषवरै नागतं बा खरं बा बैडालं वा पिनारं पलम
थ हविषा साद्रिकेनाभिषिक्तं हुत्वा कुंडे त्रिकोणे स्मरसदन
समे वापि लक्षं जितेंद्रो जित्वा वाचामधीशं जयति चिरतरं जी
वति क्ष्मातलेस्मिन् ८ येत्वश्ये कदाचिन्निविशिष्टदधियः कुंड
गोलोद्भवाक्तै जैस्नैः पर्णैरपर्णापितृवनदहने जुह्वति स्वहृद्या-

नाः तेषांतुष्टायुगानामचिरमपनयस्युत्तमांगेविधात्रा न्य
स्ता दुष्कर्मलेखाः परिलिखसिचिरैश्वर्यवाचस्पतित्वे ९ यस्त्वां
चंद्रार्धचूडांकपिलतरजटांनागयज्ञोपवीतां चंद्रापीडाग्रतना
स्थ्यांभगवतिसततंध्यायतिश्यामवर्णां स्वंस्वंसंत्यज्यकांतंकु
सुमशरभयोत्कंपमानांगयष्ट्याः कांताःकांतालकांतारतिपति
मिवतंमन्यमानाभजंते १० येत्वांकर्त्रींकपालोद्यतकरयुग
लांपिंगलांकालरात्रीं ध्यायंतस्त्वांभजंतेभगवतिसहसातेरिपू
न्नाशयंति येत्वांशूलंकपालंतरुणतरणिभांबिभ्रतींभावयंतिः
त्रैलोक्याकर्षसिद्धिर्भवतिसुमनसांक्षिप्रमीशानितेषां ११ ब्रूमः
किंवास्वरूपंजननितवमनोःसर्वमेतेनसाध्यं त्वन्मंत्रान्नह्रिती-

का॰ यो भवति परतरः सिद्धिदः साधकानां वश्याकर्षप्रमोहप्रहरण
स्त॰ मिलनद्वेषणोच्चाटनानि क्षिप्रं सिद्ध्यंति तेषां किमवरममुना
२ सिद्धयोष्टौ करस्थाः षट्कोणं भूपुरांतःस्थितमथ कमले तत्र
3 षट्कोणमन्यत् त्र्यस्रं चास्मिन्निजं ते स्मरहरमहिले यंत्रमारा
धनायाः अस्मिन्नाराध्यपीठे भगवति भवतीं भावनामात्रग-
म्यां विश्वाराध्य त्वा सिद्धिर्भवतु सुमनसां सर्वासिद्धिप्रदानां १२
जगन्मातः कालि त्रिगुणमयि रुद्राणि गिरिजे भवानि श्रीकंठ
प्रणयिनि शिवे विश्वसहिते उदंचत्कारुण्ये भगवति तवाख्यां
गुणमयीं गुणातीते नित्ये स्फुटमिति वदन्मेस्तु वदनं १३
इदं त्वन्मंत्रांगं सकलदुरितध्वंसनकरं स्तवं यः श्रद्धावान्परि

पठति कल्याणजनकं चिरं तस्य क्षोणीतलविहरमाणस्य वि-
दुषो भवातीते नित्ये भवतु भवदाराधनफलम् १५ इतिश्री
मद्रुद्रयामले तंत्रे श्रीकालिकास्तवराजः संपूर्णम्॥ शुभम्॥